श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री वेङ्कटाचार्यस्य कृतिषु

# ॥ श्रीमद्वेदान्तदेशिक अष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक अष्टोत्तरशतनामस्तोत्रम् ॥

निगमान्तगुरोर्नाम्नां प्रभावो येन वर्णितः।
तं वेङ्कटार्यमनिशं तातार्यतनयं भजे॥।

विदुषा वेङ्कटार्येण तातार्यतनुजन्मना।
वेदान्तार्यगुरोर्नाम्नां प्रभावो वर्ण्यतेतराम्॥।

सांख्यसौगतचार्वाकशाङ्करादितमोनुदम्।
त्रय्यन्तदेशिकं वन्दे वेङ्कटेशाह्वयं महः॥।

श्रीमद्वेङ्कटनाथस्य नाम्नामष्टोत्तरं शतम्।
सङ्गृह्य तत्प्रसादाय वक्ष्ये सर्वार्थसिद्धिदम्॥।

घण्टावतारोऽनन्तार्य तनयो वेङ्कटाधिपः।
श्रीमल्लक्ष्मणयोग्यंशो वरदाचार्य वीक्षितः॥ 1 ॥

रामानुजार्यसंदृष्टः सौपर्ण मनुचिन्तकः।
तार्क्ष्य दत्तवरश्शुद्धः प्रसादितहयाननः॥ 2 ॥

अधीतसाङ्ग सकलश्रुतिस्स्मृतिविदग्रणीः।
इतिहासपुराणज्ञः सुकविस्तर्कतत्त्ववित्॥ 3 ॥

भाष्यकारो भयहरः सुधाशीदुग्धराशिकृत्।
प्रधानप्रतितन्त्रज्ञो देवतापारमार्थ्यवित्॥ 4 ॥

श्रुतविद्यश्श्रावयिता श्रुतपालश्श्रुतप्रदः।
श्रितः पाण्डित्यदाता च कृतकृत्यः कृती सुधीः॥ 5 ॥

निरस्तसाङ्ख्यः प्रत्युक्तयोगः काणादभञ्जनः।
अचिच्चैतन्यवादघ्नः क्षणिकाणुमतार्दनः॥ **6** ॥

साकारधीनिराकर्ता शून्यवादतमोनुदः।
कुदृष्ट्युरगपक्षीशः सप्तभङ्गी विलोपनः॥ **7** ॥

भेदाभेदमतच्छेत्ता धूतयादवकल्पनः।
अनीशवाददम्भोळिः पाषण्डमतखण्डनः॥ **8** ॥

संरक्षितागमश्शङ्खचक्रधारणरक्षिता।
ऊर्ध्वपुण्ड्राङ्कनत्राता शुद्धसत्त्वमयाकृतिः॥ **9** ॥

यत्याचारप्रतिष्ठाता सर्वतन्त्रस्वतन्त्रधीः।
अवतार रहस्यज्ञस्त्वर्चासौन्दर्य सक्तधीः॥ **10** ॥

अर्थपञ्चक तत्त्वज्ञः तत्त्वत्रयविशेषवित्।
भक्तियोग विरोधिघ्नो भक्तिमान् भगवत्प्रियः॥ **11** ॥

ज्ञानैकसारो द्वयवित् विभक्ताधिकृतित्रयः।
चतुश्श्लोक्यर्थ सारज्ञः सम्यग्ज्ञाताङ्गपञ्चकः॥ **12** ॥

षडङ्गयोग निर्णेता सप्ततन्तुकृदुत्तमः।
अष्टाक्षरैकनिरतो नवमैकरसाश्रयः॥ **13** ॥

दशतात्पर्यविज्ञाता शतकृच्च सहस्रवित्।
स्थूललक्षोऽनेकनानाकोटिज्ञान निवर्तकः॥ **14** ॥

धर्मशङ्कुः साधुबृन्दवन्दिताङ्घ्रिसरोरुहः।
पद्माक्षानन्दजनकस्तथाऽनन्तगुणाकरः॥ **15** ॥

त्यागशब्दार्थवित् धर्मवेदी विधिविशेषवित्।
उत्तमश्लोकभावज्ञः पञ्चकालपरायणः॥ **16** ॥

सुरसेव्यः पूर्णमनाः सुरीन्द्रप्रतिरूपकः।
कवितार्किकपञ्चास्यो निगमाञ्चलदेशिकः॥ **17** ॥

वैद्यो मुनीन्द्रः सर्वज्ञ उपकर्ता तथैव च।
सत्संप्रदायस्थिरधीरनघः सत्यवागपि॥ **18** ॥

साधुवृत्तिर्मुक्तडम्भो जिताक्षो दीर्घबन्धुमान्।
दयाळुश्शासिता सर्व हिताचरणतत्परः॥ **19** ॥

महागुरुः स्वर्णवर्णः सुबाहुः पुण्डरीकदृक्।
पवित्रपाणिर्व्याख्यान मुद्राङ्कितकराम्बुजः॥ **20** ॥

सव्यपाणितलन्यस्त दिव्यपुस्तकभूषणः।
परशीर्षन्यस्त वामपादाब्ज कटकोज्ज्वलः॥ **21** ॥

इतीदं देशिकेन्द्रस्य नाम्नामष्टोत्तरं शतम्।
सङ्कीर्तयेदनुदिनं सर्वपापापनुत्तये॥ **22** ॥

पठन्नामशतं भक्त्या श्रुत्वा गुरुमुखाम्बुजात्।
प्रसादाद्देशिकेन्द्रस्य भुक्तिमुक्ती समश्नुते॥ **23** ॥

एकैकमपि तन्नाम कीर्तयन् सकृदुत्तमम्।
सर्वान् कामानवाप्नोति किमुताष्टोत्तरं शतम्॥ **24** ॥

॥ इति श्रीमद्वेदान्तदेशिक अष्टोत्तरशतनामस्तोत्रं समाप्तम्॥